वारणं ६८· सर्पसिकलिदोषघ्नमायुरारोग्यव
र्द्धनं शाकाराद्यंनामसहस्रंगोपनीयंस्वयोनिव
त् ६९ इतिश्रीत्रिपुरासारेतंत्रेचत्वराशीतितमे
कल्पेस्मनवतितमेकल्पेस्मनवतितमेध्यायेशा
कराद्यसहस्रनामश्रीमहाभगवत्याश्रीमहावि
द्याश्रीविद्यायाःश्रीषोडशाक्षर्याःश्रीत्रिपुरसुंद
रीपरदेवतायाःस्तवराजःसंपूर्णः श्रीगुरुदे
तायेनमः।।शुभम् रामनगरवालिप्रथसिले
खो।।

हो॰
१

ॐ श्रीगणेशाय नमः अथ होमविधिः मूले
न प्राणायामं अंगन्यासं करन्यासं च कृत्वा
यथोक्तकुंडे हस्तमात्रे चतुरस्र चतुरंगुलो
च्छ्रितस्थंडिले वा संस्कारचतुष्टयं कुर्यात्
तद्यथा मूलमंत्रेण समीक्ष्य फट् इति कुशै
श्चतुर्दिक्षु प्रोक्ष्य चतुर्नः संताड्य हुमिति
मंत्रेण मुष्टिबन्धेन जलेनाभिसिंचेत् स्थंडिल
मध्ये त्रिकोण षट्कोणाष्टदलभूमन्दिरयु
क्तं यंत्रं विलिख्य यंत्रमध्ये ॐ ह्रीं ॐ मिति वि
लिख्य पीठपूजां कुर्यात् तद्यथा मंडूकाय
नमः कालाग्निरुद्राय नमः आधारशक्तये
नमः कूर्माय नमः पृथिव्यै नमः सुधासिं
धवे नमः श्वेतद्वीपाय नमः कल्पवृक्षाय न
मः तन्मूले मणिमंडपाय नमः तन्मध्ये हेम
पीठाय नमः चतुर्दिदिक्षु धर्माय नमः ज्ञाना
य नमः वैराग्याय नमः ऐश्वर्याय नमः च
तुर्दिक्षु च अधर्माय नमः अज्ञानाय नमः
अवैराग्याय नमः अनैश्वर्याय नमः मध्ये
अनन्ताय नमः तत्वपद्माय नमः आनन्द
कन्दाय नमः संविन्नालाय नमः प्रकृतिम

यपत्रेभ्योनमः विकृतिमयकेसरेभ्योन
मः पंचाशद्वर्णवीजाढ्यकर्णिकायैनमः
तत्रैव अर्कमंडलायनमः चन्द्रमंडलायन
मः वह्निमंडलायनमः संसत्वायनमः रं
रजसेनमः तंतमसेनमः आत्मनेनमः
अंतरात्मनेनमः परमात्मनेनमः ज्ञाना
त्मनेनमः मायातत्वायनमः कलातत्वा
यनमः विद्यातत्वायनमः परतत्वायनमः
ततःपीठशक्तीःपूजयेत् ॐजयायैनमः
ॐविजयायैनमः ॐअजितायनमः ॐअप
राजितायैनमः ॐनित्यायैनमः ॐविलासि
न्यैनमः ॐदोग्ध्रैनमः ॐअघोरायैनमः म
ध्ये मंगलायैनमः ह्रींवागीशीवागीश्वरयो
योगपीठात्मनेनमः इतिशाक्तपीठे वैस्न
वपीठेतु ह्रींलक्ष्मीनारायणयोर्योगपी
ठात्मनेनमः ॐह्रींवागीश्वरीभ्यांनमः
इतिमंत्रेणपूजयेत् वैस्नवपीठेतु ॐह्रीं
लक्ष्मीनारायणाभ्यांनमः इतिमंत्रेणपूज
येत् ततः सूर्यकान्तादर्शीतः श्रोत्रियागा
रतोपिवा पात्रेणपिहितेपात्रेवह्निमानी

हो॰
२

ययेत्ततः फडिति मंत्रेण वह्निपात्रमादाय ऊ
मिति मंत्रेणोद्घाट्य फडिति मंत्रेण क्रव्या
दांशं वह्निं नैर्ऋत दिशि त्यजेत् मूलेनस्त्र
ग्नेसंस्थाप्य पुनः पूर्वोक्तसंस्कारंच तत्रैवं
कुर्यात् तद्यथा मूलेन वीक्ष्य फडिति मंत्रे
ण कुशैः संप्रोक्ष्य फडिति कुशैः संताड्य ऊ
मिति मुष्टिना सिंचेत् परमात्मना जाठरा
ग्निना च तस्याग्नेरैक्यं संचिंतयेत् रमिति
मंत्रेण वह्नौ चैतन्यं योजयेत् ततः ओंकारे
णाभिमंत्र्य वमिति मंत्रेण धेनुमुद्रयाऽमृ
तीकृत्य फडिति मंत्रेण संरक्षेत् हुमिति
मंत्रेणाऽवगुंठ्य ओंकारेण कुंडोपरि त्रिःभ्रा
म्य ध्यायागतामृतुस्नातां नीलेन्दीवरधा
रिणीम् देवेन भुज्यमानां तां स्मृत्वा तद्योनि
मंडले ईश्वरेतोधिया वह्निं स्थापयेदात्म
संमुखम् ततो जानू एष्ट्वा धरानलः मूल
मंत्रं पठन् हूं वह्नि चैतन्याय नमः इति मं
त्रंच पठन् देवीदेवयोराचमनं दद्यात्
चित्पिंगल हन हन दह दह पच पच सर्व
ज्ञाज्ञापय स्वाहेति मंत्रेण वह्निं प्रज्वाल्य

ज्वालिनीमुद्रां प्रदर्श्य अंजलिं बद्ध्वा उत्थाय अ
ग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् सुवर्ण
वर्णममलं प्रसन्नं विश्वतोमुखम् इति मंत्रेण
उपतिष्ठेत् ॐ अस्य श्री षड्विंशतिवर्णा वह्नि मं
त्रस्य भृगुऋषिः गायत्री छन्दः अग्निर्देवता रं
बीजम् ठद्वयं शक्तिः हवने विनियोगः ॐ वै
श्वानर जातवेद इहावह लोहिताक्ष सर्वक
र्माणि साधय स्वाहेति मूलाधारोद्भूतं संवि
दग्निं ललाटनेत्रद्वारा निर्गमय्य तं बाह्याग्नि यु
क्तं पातयेत् ततः स्वदेहे न्यासं कुर्यात् भृगवे
ऋषये नमः शिरसि गायत्रीछन्दसे नमो मुखे
अग्नये देवतायै नमः हृदये रं बीजाय नमः
गुह्ये स्वाहा शक्तये नमः पादयोः तद्यथा स्रूं
हिरण्यायै नमः लिंगे स्रूं गगनायै नमः गुदे
स्रूं रक्तायै नमः शिरसि स्रूं कृष्णायै नमः मुखे
स्रूं सुप्रभायै नमः घ्राणे स्रूं वज्ररूपायै नमः
नेत्रयोः स्रूं अतिरक्तायै नमः सर्वांगेषु ततो
देवन्यासं कुर्यात् देवेभ्यो नमः लिंगे पितृभ्यो
नमः गुदे गंधर्वेभ्यो नमः शिरसि यक्षेभ्यो न
मः मुखे नागेभ्यो नमः घ्राणे पिशाचेभ्यो नमः

होम ३

नेत्रयोः राक्षसेभ्योनमः सर्वांगेषु अथषडंगन्या
सः सहस्रार्चिषेनमः हृदि स्वस्तिपूर्णायन
मः शिरसि उत्तिष्ठ पुरुषायनमः शिखायैव
षट् धूम्रव्यापिनेकवचायहुं सप्तजिह्वायने
त्रत्रयायवौषट् धनुर्धरायअस्त्रायफट् अथा
ग्निरष्टमूर्तिन्यासः ओंअग्नयेजातवेदसेनमः
मूर्ध्नि ओंअग्नयेसप्तजिह्वायनमः वामांसे
ओंअग्नयेहव्यवाहनायनमः वामपार्श्वे ओंअ
ग्नयेअश्वोदर्यायनमः वामकटौ ओंअग्नये
वैश्वानरायनमः लिंगे ओंअग्नयेकौमारते
जसेनमः दक्षिणकटौ ओंअग्नयेविश्वमुखा
यनमः दक्षपार्श्वे ओंअग्नयेदेवमुखायनमः
दक्षिणांसे ततःमण्डकादिवह्निमंडलपर्यन्त
पीठदेवताःस्वदेहेन्यसेत् ततःअग्निपीठश
क्तिन्यासः ओंपीतायैनमः १ ओंश्वेतायैनमः
२ ओंअरुणायैनमः ३ ओंकृष्णायैनमः ४ ओं
धूम्रायैनमः ५ ओंतीव्रायैनमः ६ ओंस्फुलि
गिन्यैनमः ७ ओंरुचिरायैनमः ८ ओंज्वालि
न्यैनमः ९ ओंरंवह्निपीठासनायनमः १० त
तःस्वदेहे अग्निंध्यायेत् त्रिनेत्रमारक्तं तनु

सप्तक्तवक्त्रं हववर्णस्वजमग्निमीडे वराभय
स्वस्तिकशक्तिहस्तं पद्मस्थमाकल्पसमूह
युक्तम् एवं ध्यात्वा मानसोपचारैः पूजां कुर्या
त् ततः जलेन परिषिच्य प्रागग्रानुदगग्रान्वा त्री
न्दर्भान्परिस्तरेत् ततः कुंडे स्थंडिले वा त्रि
कोणाकारास्तिस्रः समिधः पालाशसमि
धः बिल्वसमिधश्च स्थापयेत् तत्र पश्चिमे ब्र
ह्मणे नमः दक्षिणे विष्णवे नमः उत्तरे रुद्रा
य नमः ततः मंडूकादिपरतत्त्वांतपीठदेवता
संपूज्य पीठशक्तीः पूजयेत् पीतायै नम उ
ग्रादि तत्र स्वहृदयादनलमावाह्य गंधादिभिः
समभ्यर्च्य षट्सु कोणेषु मध्ये च जिह्वास्तद्देव
ता यजेत् ईशानादिषु वायुकोणेषु षट्
समर्चयेत् हिरण्या च तिरिक्तान्तं मध्ये तु व
ज्ररूपिणीम् केसरेषु गणपूजा स्याद्दलेष्वष्टसु
मूर्तयः मातरोऽष्टौ दलाग्रेषु भैरवास्तदग्रतः
धराधरे तु शक्राद्या वज्राद्यायुधसंयुताः एव
मावरणैर्युक्तं समभिर्णीवकं यजेत् असितां
गो रुरुश्चैव क्रोध उन्मत्तसंज्ञकः कपाली भीष
णश्चापि संहारश्चाष्टभैरवाः ततः स्ववामकु

हो· शानयास्तीर्य तत्रवस्तूनि निःक्षिपेत् प्रणीताप्रो
४ क्षणीपात्रेआज्यस्थालीस्रुवंस्रुचम् अधोमुखा
नि चैतानि होमद्रव्यं च तत्कुशान् समिधः पं
चपालाशीरन्यदप्युपयोगि यत् ततः मूल
मंत्रेण पवित्रद्वयकरणं ततः मूलेनस्रुभां
भसा सर्ववस्तुप्रोक्षणम् ततः प्रणीतादीनि
उत्तानानि विधाय प्रणीतां जलैः पूरयेत् गंगेच
यमुने चैवेति मंत्रेण तीर्थान्यावाह्य अंकुशा
मुद्रया पुष्पादिकं निक्षिप्य पवित्रे धृत्वा उत्प
वनं कुर्यात् प्रणीतापात्रं उत्तरस्यां निधाय
प्रणीतातः किंचिज्जलमुद्धृत्य प्रोक्षणीपात्रे
क्षिपेत् पवित्रे गृहीत्वा प्रोक्षणीजलेन ह
वनीयद्रव्यं मूलं पठन् प्रोक्षयेत् ततः दक
क्षिणतः ब्रह्मासनमास्तीर्य तत्र अंकुशामु
द्रयो ओमिति अत्र कर्मणि कृताकृतावेक्ष
कत्वेन त्वं ब्रह्मा भवेत्यावाह्य ओंनमो ब्रह्म
णे इति गंधादिभिरभ्यर्चयेत् ततः स्रुक्स्रु
वौ समादाय अधोमुखौ वह्नौ विधाप्य तापय
वामहस्ते कृत्वा दक्षिणहस्तेन कुशेन तयो
रग्रमूलमध्यानि मार्जनं कृत्वा अर्घ्योदके

न्त्रिवारं संप्रोक्ष्य पुनर्वन्हौ प्रताप्य दर्भान
ग्नौ प्रक्षिपेत् ततः स्रुवे ह्रां इच्छाशक्त्यै नमः मूले
ह्रीं ज्ञानशक्त्यै नमः मध्ये ह्रूं क्रियाशक्त्यै नमः अ
ग्रे एवं स्रुचि ततः आत्मदक्षिणे कुशोपरि निद
ध्यात् ततः आज्यस्थालीमादाय अस्त्राय फडि
ति प्रक्षाल्य अग्नौ त्रिः परिताप्य वामहस्तेन
संस्थाप्य दक्षिणहस्तेन अर्घोदकेन त्रिः प्रो
क्ष्य पुनरग्नौ प्रताप्य आत्मसंमुखे स्थापये
त् आज्यमानीयाज्यस्थाल्यां निक्षिप्य मूलेना
ज्यं वीक्ष्य अस्त्राय फडिति आज्यं प्रोक्ष्य अस्त्राय
फडिति दर्भैर्हुतं संताडय हूमिति अर्घ्यजलेन
अभ्युक्षेत् इति संस्कारचतुष्टयं कृत्वा ततः कु
डादंगारानुद्धृत्य वायुकोणे संस्थाप्य नम इ
ति मंत्रेण आज्यस्थालीं स्थापयेत् इदं ताप
नम् ततः दर्भयुगलं प्रज्वाल्य आज्ये निक्षिप्य
दंग्यशोधंनम इति मंत्रेण वन्हौ क्षिपेत् इदं
पवित्रीकरणम् पुनर्ज्वलितेन दर्भयुग्मेन
हूमिति मंत्रमुच्चरन् हुतं नीराज्य अग्नौ प्र
क्षिपेत् इत्युद्योतनम् ततः प्रज्वलितकु

हो॰
५

प्रामुष्टिं गृहीत्वाऽस्त्राय फडिति मंत्रमुच्चरन्
दर्शयेत् इतिउद्योतनम् तस्मादगारादाज्य
स्थालीमानीयं आत्मसंमुखे संस्थाप्य तानं
गारानग्नौ प्रक्षिप्यांगारस्थानमार्जनं कृत्वा
जलं स्पर्शयेत् ततः उत्तानयोर्हस्तयोरंगुष्ठ
कनिष्ठिकाभ्यां पवित्रं पृथक् पृथक् धृ
त्वास्त्राय फडिति मंत्रमुच्चरन् प्राङ्मुखं
छन्तमुत्पूयात् पवित्रं स्थानांतरे स्थाप
येत् पुनस्तेनैव प्रकारेण तथैव धृतेन
पवित्रांतरं गृहीत्वा तेन पवित्रेण नम इति
मुच्चरन् आत्मनोभिमुखं वह्नौ संप्लाव्य पूर्वं
स्थापित पवित्र हवमग्नौ प्रक्षिप्य इतिउ
त्पवनोत्पवने पवने पवनेन चाज्यस्य सं
स्कुर्यात् संस्कारषडुदीरिताः ततः प्रादेश
मात्रं सग्रंथि दर्भयुगलमाज्यस्थाल्यां घृत
मध्ये निक्षिप्य आज्यदक्षिणभागे शुक्लपक्ष
म् आज्यवामभागे कृष्णपक्षं विचिंत्य वामे
इडां दक्षे पिंगलां मध्ये सुषुम्णां ध्यात्वा हो
मं कुर्यात् ततः स्रुवेण नम इति मंत्रमु
च्चरन् दक्षिणभागाद्घृतमादाय ॐ अग्न

ये स्वाहा इत्यग्नेर्दक्षिणलोचने जुहुयात् सं
पातमाज्यं तत्रैव दक्षिणभागे निक्षिपेत् पु
नर्नम इति मंत्रेण वामभागाद्धृतमादाय
सोमायनम इति वामलोचने जुहुयात् सं
पातमाज्यं तत्रैव वामभागे क्षिपेत् पुनर्नम
इति मंत्रेण मध्यभागात् घृतमानीय अग्नी
षोमाभ्यां स्वाहा इति वह्नेर्ललाटनेत्रे हु
त्वा संपातमाज्यं मध्यभागे क्षिपेत् गोपा
लपक्षे ललाटनेत्राहुतिं न कुर्यात् नरसिं
हविषये कुर्यादेव पुनर्नम इति दक्षिणभा
गादाज्यमादाय अग्नये स्विष्टिकृते स्वाहा इ
त्यग्ने वक्त्रे हुत्वा संपामाज्य तत्रैव क्षिपेत्
इत्यग्निवक्त्रोद्घाटनम् ततः स्वाशब्दमुच्चार्य
आहुतिं दत्वा हाशब्दमुच्चार्याहुतिशेषं घृतं
तत्रैव स्थापयेत् ततो महाव्याहृतिशेषं स्था
पयेत् ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वा
हा ॐ भूर्भुवः स्वः स्वाहा ॐ वैश्वानरजातवे
द इहावह लोहिताक्ष सर्वकर्माणि साधय
स्वाहा इत्यग्निमंत्रेणाहुतित्रयं दत्वाहुतशे
षं जलं पूर्णपात्रे स्थापयेत् ततः अग्नेर्गर्भा

यानादिषोडशसंस्कारान्कुर्यात् यथा गर्भाधा
नं पुंसवनं सीमन्तोन्नयनं पुनः अनन्तरं जा
तकर्मस्यानामकरणं तथा उपनिष्क्रमणं
पश्चात् अन्नप्राशनमीरितम् चूडोपकरणे
भूयो महानाम्नो महाव्रतम् अथोपनिषदं
स्नानं गोदानोद्वाहनेस्मृतिः शुभेषुसु विवाहां
ताक्रियास्ताकूरकर्मसु मरणांता समुद्दिष्टा
वह्नेरागमवेदिभिः यथा अग्ने गर्भाधानं क
ल्पयामि स्वाहा अग्ने पुंसवनं कल्पयामि
स्वाहा इत्यष्टाहुतिर्जुहुयात् अग्ने सीमंतो
न्नयनं कल्पयामि स्वाहा तत्समये अग्ने
त्वं अमुकनामासि ततन्मंत्राधिष्ठात्रिदेवता
नाम्नानामकुर्यात् अथवा अग्ने त्ववरदना
मासि विश्वरूपनामासि वानामकुर्यात् ततः
अमुकनामाग्नये निष्क्रमणं कल्पयामि स्वा
हा इत्यष्टाहुतिर्जुहुयात् एवं संस्कारादिकं
कुर्यात् ततः तस्यपितरौ संपूज्य आत्मनियो
जये तस्यपितरौ वागीश्वरी वागीश्वरौ य
था उं वं पाद्यं वागीश्वर्यै नमः इति पाद्यादि
भिः संपूज्य वागीश्वर्यै नमः इति पुष्पांजलि

त्रयं दत्वा वागीश्वर्यै नमः इति नमस्कुर्यात्
एवं वागीश्वरं संपूज्य वागीश्वरीसहितवागी
श्वरपूजितोसि देवमस्वेस्तु क्षमां संहारमुद्रयास्थ
ण्डिलांतं वह्निं सापुटे स्नानीयस्वरूपदिस्था
पयेत् ततो नेर्जिह्वांगमूर्तीनां मंत्रैरेकैकाहु
तीर्जुहुयात् यथा सूं हरिण्यायै नमः इत्ये
काहुतिं जुहुयात् एवमग्रेपि सूं गगनायै
नमः सूं रक्तायै नमः भूं कृष्णायै नमः लूं
सुप्रभायै नमः पूं वहुरूपिण्यै नमः खूं अति
रक्तायै नमः सहस्रार्चिषे हृदयाय स्वाहा
उतिष्ठपुरुषाय शिखायै वौषट् धूमव्यापि
नेकवचाय हुम् स्वाहा सप्तजिह्वाय नेत्रत्र
याय वौषट् स्वाहा गोपालपद्धे सप्तजिह्वा
यनेत्राभ्यां वौषट् धनुर्धराय अस्त्राय फट्
स्वाहा अग्नये जातवेदसे स्वाहा १ अग्नये
सप्तजिह्वाय स्वाहा १ अग्ने कव्यवाहनाय
स्वाहा १ अग्नये अश्वोदरजाय स्वाहा १ अग्न
ये वैश्वानराय स्वाहा १ अग्नये कौमारतेजसे स्वा
हा १ अग्नये विश्वमुखाय स्वाहा १ अग्नये देव
मुखाय स्वाहा १ ततो वामहस्ते स्रुवं संस्था

होे० ७

ण दक्षिणहस्तेन स्रुवमादाय नम इतिमुच्चर न्न स्रुवेन चतस्राज्याहुतीः स्रुचीदत्वाऽधोमुखेन स्रुवेन स्रुवं पिधाय उत्तिष्ठन् वैश्वानरजातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा वौषट् इत्यनेनमंत्रेण पूर्णाहुतिं दत्वा व्यस्तेन च दशाऽऽहुतीर्जुहुयात् ॐ स्वाहा १ ॐ श्रीं स्वाहा २ ॐ श्रीं ह्रीं स्वाहा ३ श्रीं ह्रीं क्लीं स्वाहा ४ ॐ श्रीं ह्रीं क्लीं ग्लौं स्वाहा ५ ॐ श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा ६ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपये स्वाहा ७ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरव रद स्वाहा ८ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा ९ इति दशाहुतीर्हुत्वा अग्नौ इष्टदेवतां यंत्रे ध्यात्वा विष्णुपीठे देवतां ध्यात्वा वाह्याग्निना सहैकं विभाव्य वह्निरूपां तां विचिन्त्य नित्यपूजाक्रमेण सपरिवारां तां संपूज्य नैवेद्यं दत्वा पुनराचमनीयं दत्वा तांबूलं निवेद्य मूलेनामुकदेवतायै नम इति पुष्पांजलित्रयेण संपूज्य नमस्कुर्यात् ततो वह्नीष्टदेवतयोरात्मनाच सहैक्यं वि

भाव्य तस्या मुखे पंचविंशत्याहुतीर्जुहुयात् य
था मूलमुच्चरन् इदं स्वाहाऽमुकदेवतायै प्रत
क्रमेणैव पंचविंशत्याऽहुतीर्जुहुयात् इदं ऐकी
करणम् ततोवह्निदेवतयोरात्मनाच सहैक्यं
विभाव्य मूलेनैकादशाहुतीर्जुहुयात् इदं
तुनाडीसन्धानम् जुहुयादंगमुख्यानामा
हुतीनामनुक्रमात् एकैकामाहुतिं सम्यक्त
र्पिषादैशिकोत्तमः इष्टदेवस्याहुतीनामेकै
काहुतिं चरेत् ततस्तन्मूलमंत्रेण दशधाजु
हुयाद्धुतम् ततः कल्पोक्तद्रव्येण दशांशं जुहु
याज्जपात् होमं समाप्य कुर्वीत पूर्णाहुतिम
तन्द्रधीः होमावशिष्टेनाज्येन पूरयित्वा स्रुवं
सुधीः पुष्पफलं निधायाग्ने स्रुवेणाथ तं
पुनः उत्थितो वैवौषडंतेन मूलेन जुहुयाद्व
सौ तद्वचोहुतीणांच जुहुयादाहुतिं पृथ
क् देवं विसृज्य स्वल्पादिवह्ने जिह्वागमूर्तिभिः
जुहुयात् व्याहृतीर्हुत्वा प्रदेत्तस्थोत्तिणीजलैः
संप्रार्थ्यानेन मनुना नत्वा तं विसृजेद्धृदि भो
भो वह्ने महाशक्ते सर्वकर्मप्रसाधक कर्मान्त
रेपि संप्राप्ते सान्निध्यं कुरु सादरम् वह्नेपादि

हो॰ प

देतिक्षिपञ्चपर्णीताम्बुभुविक्षिपेत् विधिंविस्
ज्यसकुशान् परिधीन्विन्यसेवसो एवंहोमं
समाप्याथतर्पयेद्देवताजलैः इतिमंत्रमहो
दध्यनुसारिणीहोमपद्धतिः ॥
आवाहनद्वंशांशेनतर्पणादभिषेचनम्
तर्पयामिनमस्त्वेतिद्वितीयांतेष्टपूर्वकम्
मूलांतेत्वपदंदेयंसिंचामीत्यभिषेचने त
तोनानाविधैरन्नैस्तर्पयेद्विजसज्जमान् इष्ट
रूपान्समाराध्यतेभ्योदद्याच्चदक्षिणाम्
न्यूनेसंपूर्णतामेतिब्राह्मणाराधनात्क्षणम्
म् देवतास्त्वप्रसीदंतिसंपद्यंतेमनोरथा

॥ इति ॥

शा॰
शो॰
१

ॐनमः गुरवे श्रीभैरवोवाच अधुनासृणुदे
वेशिशक्तिशोधनमुत्तमं येनश्रवणमात्रे
णपराशक्तियदालभेत् अदीक्षितकुलासं
गात्सिद्धिहानिःप्रजायते तत्कथाश्रवणंचे
त्स्याततत्यागमनंयदि श्रीदेव्युवाच कुला
चारक्रमार्चायांसिद्धिंकामयतेतुयः सकुली
नःकथंदेवपूजयेत्कुलयोषितं श्रीभैरवउ
वाच संशोधनमकृत्वावैश्रीषुमयेषुकौलि
कः कृतेपिसिद्धिहानिस्यात्कुष्ठाभवतिचंडि
का अभिषेकाद्भवेत्सिद्धिंमंत्रस्योच्चारणाच्छु
भा रतिकालेमहेशानिदीक्षाकालेचकन्य
का वलाद्गायन्ततोवुद्ध्या त्तवयेत्परयोषितं
सुरयारेतसावापिजलेनमधुनाथवा संभो
गेमिषिकेन्नारीचंडांवामंत्रवर्जितां स्वकी
यंपरकीयंवारूपयौवनगर्विता श्रीदेव्यु
वाच भगवन्देवदेवेशाकुलाचारैकसिद्ध
ये कुलयोगीकथंकुर्याच्छोधनंकुत्रयोषि
तां श्रीभैरवउवाच कुलाज्ञोप्यवनीवीक्ष
नमस्कुर्यात्कुलेश्वरः विधायमानसांपू
जांमंत्रयोगीसमुच्चरेत् वालांवायौवनो
न्मत्तांवृद्धांवासुंदरीनथा कुत्सितांवामहा

इष्टं नमस्कृत्य विभावयेत् तासां प्रहारं निंदां च कौ
टिल्यमप्रियं तथा सर्वथा नैव कर्त्तव्यमन्यथा सिद्धि
रोधकृत् स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव हि भू
षणं स्त्रीगणेषु सदा भाव्यमन्यथा स्वस्त्रियामपि वि
परीतरता साधिभविता हृदयोपरि साधकस्य भवे
द्वास्तु कामयेत्तु रिवापरा तायमीजायते तेन न कस्मी
द्धर्महा भवेत् तत्परः परतन्त्वीनोपरात त्वे प्रलीय
ते नटी कापालिकी वैश्या रजकी नापितांगना ब्रा
ह्मणी शूद्रकन्या च तथा गोपालकन्यका मालाकार
स्य कन्यापि नव कन्याः प्रकीर्त्तिताः एतासु कां विदानी
य संशोधमथाचरेत् पूजये कौलिको देवि यथाव
द्दर्पितेमया शक्तिशोधनमंत्रस्य ऋषिः प्रोक्तः स
दाशिवः त्रिष्टुछंद इति ख्यातं देवता च परांबिका
वाग्बीजं बीजमीशानि शक्तिः शक्तिरितीरिता कामे
शः कीलकं देवि दिग्वंधो हरमीश्वरि भोगापवर्ग
सिद्ध्यर्थे विनियोगो वरेश्वरि महानिशायामानी
य नवकन्याश्च भैरवान् एकादश नवाष्टौ वा कौ
लिकः कौलिकेश्वरि शोधयेत्त्वभिर्मंत्रैः पूजये
त्कौलिको नमः साधकः संस्पर्शो हृदौकृत्वा विष्ट
रशोधनं मूलस्तु हिंविधायापि प्राणार्पणविधिं च
रेत् मंत्रसंकल्पकं कृत्वा मुद्रादीन्यासमाचरेत् वि

पा॰ शो॰ २

थायमातृकान्यासं करांगन्यासपूर्वकं स्वपीठार्चां वि
धायाथ श्रीचक्रार्चनमाचरेत् संशोध्य देवद्रव्याणि
कुंडगोलादिकं तथा वीरार्चनं वीरकांतासेवनं देव
डलिमं यथोक्तविधिना देवीं संपूज्य श्रीपरांबिकां शा
क्तिं वा मेतसंस्थाप्य पूजयेद्धर्णिने यथा त्रिकोणं वा
षट्कोणमष्टपत्रं यमथो हृदि शिववीजकामत्र
हेतित्रयं महेश्वरि बलत्रयं नवत्रयं सिद्धरेणा वि
भावयेत् श्रीचक्रे स्थापयेद्वामे कन्यां भैरववल्लभां
युक्तके पीवीतलज्जां सर्वाभरणभूषितां सर्वशृंगार
शोभाढ्यां तारुण्यं मदगर्वितां अनंतलीनहृदयां सौं
दर्यातिमनोहरां शोधयेच्छुद्धिमंत्रेण स्वरानंदामृ
तांबुभिः बालाबीजत्रयं देवी प्रोच्चार्य तदनंतरं त्रि
पुरायै ततो विश्वविश्वातेनामपूर्वकं इमां शक्तिं प
वित्रीति कुरुयुग्ममसमुद्धरेत् ममशक्तिं कुरुयुग्मं
वह्निजायां समुद्धरेत् मंत्रेणानेन देवेशि कामिनी
मभिषेचयेत् चाभिषिंच्य कुमारीं तां न्यासजालं प्र
विन्यसेत् मातृकावन्महादेवि कामवाणं ततो न्य
सेत् चंद्रबीजं हृद्ये देवि कामराजं च मोहनं शक्ति
बीजं ततो देवि यथावद्विन्यसेत्प्रिये ललाटे वदने
न्यस्य हृदयोनित्रमंडले सर्वसंक्षोभनेवाणं सर्व
विद्रावणं तथा सर्वाकर्षणवाणं च सर्वसंमोह

नेनथा सर्वाकर्षणवाणंच सर्वसंमोहनततः व
शीकरणवाणंच पंचोर्थैः पंचवाणकाः विन्यस्यवा
णमुद्राश्च पंचैता देवि दर्शयेत् योनिविंवेजपेन्मंत्रा
नचयान्वर्णयाम्यहं नटिनीशोधनमंत्रोद्धारः तारं
वंद्रंचवाग्बीजं कामं शक्तिंततो वदेत् ठद्वयं प्रोद्धृ
रेदंतं मंत्रोयं नटिनीप्रियः प्रकाशं ॐ ह्रैं एँ क्लीं सौः
स्वाहा कपालिनीशक्तिशोधनं मंत्रोद्धारः कालीं
कूर्चं परां शक्तिं कामं कापालिनीप्रिये रेतो मुंच पु
नर्द्वयादंते दहनवल्लभा देवि कापालिकामंत्रका
मे देववशंकरः प्रकाशं क्रीं हूँ ह्रीं सौः क्लीं कापालि
नीप्रियेरेतं मुंच मुंच स्वाहा वेश्याशक्तिशोधनमं
त्रोद्धारः तारं हंदं च ह्रीं तं मे च षड्दीर्घबीजकं
वेश्ये कामं द्वये रेतो मुंच युग्मात् अग्निवल्लभा वेश्या
शोधनमंत्रोयं सर्वकौलिकवल्लभाः प्रकाशं ॐ
ह्सौः वां वीं हूं वैं वौं वः वेश्ये कामदुघे रेतो मुंच मुं
च स्वाहा अथ रजकीशक्तिशोधनमंत्रोद्धारः
वेद्याद्यं वाग्भवं कामं शक्तिं लक्ष्मीं परां स्मरेत् र
जकीति महासिद्धिं देहि मे द्वयं रजकीशु
द्धिमंत्रोयं कुलयोगिद्वलेकरः प्रकाशं ॐ ऐं क्लीं
सौः श्रीं ह्रीं रजकी महासिद्धिं देहि देहि फट् फट् स्वा
हा अथ नापितांगनाशक्तिशोधनमंत्रोद्धारः ता

षा· षो· ३

रंतारात्रयंवखंषौच्चरेन्नापितांगना हरयुग्मं
चमेविघ्नान्हरंमंचद्वयंततः नापितस्त्रीसुद्धि
मंत्रोमहामंगलप्रदायकः ओंखुंडुंएंस्रौं नापितां
गनाहरहरमेविघ्नानफट्स्वाहा अथब्राह्म
णीशाकिसाधनमंत्रोद्धारः वेदाद्यंभूतिबी
जंचसुंचसुंचेतिसर्वदा सिद्धिंमेदेहिदेही
तिहंदहनवल्लभा ब्राह्मणीसिद्धिमंत्रोयंम
हासिद्धिप्रदायकः प्रकाशः ओंह्रींओंह्रींओं
ब्राह्मणीस्सरंवीर्यंमेचसुंचसर्वदासिद्धिंमेदे
हिदेहिफट्स्वाहा अथशूद्रकन्याशाकिसा
धनमंत्रोद्धारः तारंरमारमातारंशूद्राणीच
रतप्रिये रेतस्तंभयमेसिद्धिंदेहियमंततो
वनं शूद्राणीसिद्धिमंत्रोयंकामिनीजनमो
हनः प्रकाशः ओंश्रींश्रींओंशूद्राणीरतिप्रिये
रेतस्तंभयमेसिद्धिंदेहिदेहीस्वाहा अथगो
पालकन्याशाकिसाधनेमंत्रोद्धारः तारकं
शिवषट्दीर्घसंयुतंमडबीजकं गोपालि
मेसिद्धिंदेहिद्रावयद्रावयमुद्धरे ठद्वयांतोम
हामंत्रोगोपीसाधनसाधकः प्रकाशः ओं
गांगींगूंगैंगौंगः गोपालिमेसिद्धिंदेहिद्रा
वयद्रावयस्वाहा अथमालाकारस्यक

त्याशक्तिशोधनमंत्रोद्धारः तारद्वयीसंपुटितांम
ह्रीकांह्रीचसंपुटां उद्धृत्यमालिनिप्रेमकुरुयुग्मं
मयिस्मरेत् तारगांठद्वयंप्रांतेमंत्रोयंमालिनीप्रि
यः अकाराद्यं ॐग्लांग्लींग्लूंग्लैंग्लौंग्लः ॐमालिनि
प्रेमकुरुकुरुमयिफट्स्वाहा एवंशोधनमंत्रास्ते
वर्णिताश्चष्टपञ्चया योनौजपेत्कुमारीणांकौ
लिकःकरमालया संजप्यदत्तकर्णेचमूलमंत्रंत्रि
रुच्चरेत् यदीदिनापिदेवेशिदीक्षितैवभवेत्तदा
दीक्षितांशोधितांवीरोभजेत्सर्वार्थसिद्धये तारं
व्योमभौमकंचशिवायेतिस्वयंध्रुवं संपूज्याशि
वमंत्रंचजपेत्संस्तभ्यसंभजे जप्त्वानिरुद्धानंदंडं
करभीत्तुंडमुद्रया आनंदतर्पितांकांतांविरस्तानं
नविग्रहैः रेतेनतर्पयेत्तत्रश्रीचक्रेवीरसंसदि
पठन्स्मरणवमुद्धृत्यमंत्रराजंकुलेश्वरी धर्माधर्म
हविर्दीप्तेस्वात्माग्नौमनसास्रुवा सुषुम्णावर्त्म
नानित्यमक्षहत्तीर्जुहोम्यहं स्वाहांतमंत्रमुच्चा
र्यंजपमूलस्मरन्परां कुर्यादिपनंतेमंत्रीमंत्रसि
द्धिमवाप्नुयात् रेतांतेसंजपेन्मूलंपठेन्मंत्रमिमं
पुनः तारद्वयांतगतंपरमानंदकारणं ॐप्रका
शाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचं धर्माध
र्मकलास्नेहपूर्णपवह्नौज्जुहोम्यहं स्वाहांतेनाशु

श. शो. ४

मंत्रेणस्रुक्रमादायपार्वति श्रीचक्रेतर्पयेदेवींततः
सिद्धिमवाप्नुयात् संपूज्यदेवदेवेशंस्तुत्वानत्वाप
रस्परं संहारमंत्रयामंत्रीशक्तिंवीरान्विसर्जयेत्
इतीदंपरमंदिव्यंशक्तिशोधनमुत्तमं तवस्नेहेन
निर्णीतंगोपनीयंतमुत्तमैः इतिश्रीरुद्रयामले
तंत्रेशक्तिशोधनविधिः संपूर्णम् ॥

रामनगरकापोथी ॥

ॐ श्रीगणेशाय नमः ॐ अस्य श्रीगुरुगीतास्तो
त्रमंत्रस्य परमशिव ऋषिः विराट् छंदः श्रीगु
रूपरमात्मा देवता हं बीजं सः शक्तिः क्रौं कील
कं श्रीगुरुप्रसादसिद्ध्यर्थे जपे विनियोगः अथ
करन्यासः ॐ हं सां सूर्यात्मने अंगुष्ठाभ्यां नमः
ॐ हं सीं सोमात्मने तर्जनीभ्यां नमः ॐ हं सूं निरं
जनात्मने मध्यमाभ्यां नमः ॐ हं सैं निराभासा
त्मने अनामिकाभ्यां नमः ॐ हं सौं अतनुसूक्ष्मात्म
ने कनिष्ठिकाभ्यां नमः ॐ हं सः अव्यक्तात्मने कर
तलकरपृष्ठाभ्यां नमः अथ हृदयादिन्यासः
ॐ हं सां सूर्यात्मने हृदयाय नमः ॐ हं सीं सोमात्म
ने शिरसे स्वाहा ॐ हं सूं निरंजनात्मने शिखायै व
षट् ॐ हं सैं निराभासात्मने कवचाय हुं ॐ हं सौं
अतनुसूक्ष्मात्मने नेत्रत्रयाय वौषट् ॐ हं सः अव्यक्ता
त्मने अस्त्राय फट् अथ ध्यानम् हंसाभ्यां परिवृत्त
पत्रकमलैर्दिव्यैर्जगत्कारणैर्विश्वोत्कीर्णमनेक
देहनिलयं स्वच्छंदमात्मेच्छया तत्तद्योग्यतया स्व
देशिकतनुं भावैकदीपांकुरं प्रत्यक्षाक्षरविग्रहं
गुरुपदं ध्यायेद्विवाङ्गं गुरुं १ विश्वव्यापिकमादि
देवममलं नित्यं परं निष्कलं नित्योद्बुद्धम् हंस

पत्रकमलैर्लिंप्याद्वैर्मंडपैः नित्यानंदमनंतपू
र्णानखिलंतद्ब्रह्मनित्यंस्मरेदात्मानंस्वमनुप्रवि
श्यपङ्कहृरेस्वच्छंदंतःसर्वगः २ इतिध्यानम् संअं
गुष्ठाभ्यांनमः ह्रुंतर्जनीभ्यांनमः रंमध्यमाभ्यां
नमः वंअनामिकाभ्यांनमः नंकनिष्ठिकाभ्यांन
मः मःकरतलकरपृष्ठाभ्यांनमः अथाङ्गन्यासः
संहृदयायनमः ह्रुंशिरसेस्वाहा रंशिखायैवष
ट् वंकवचायहुं नंनेत्रत्रयायवौषट् मःअस्त्रा
यफट् श्रीसद्गुरवेनमः ऋषिरुवाच गुह्याद्गुह्य
तराविद्यागुरुगीताविशेषतः त्वत्प्रसादाच्च
मेश्रोतव्यंतत्सर्वंब्रूहिमेसूत १ सूतउवाच कै
लासशिखरेरम्येभक्तिसाधाननायकं प्रणम्यपा
र्वतीभक्त्याशंकरंपरिपृच्छति २ पार्वत्युवाच
ॐनमोदेवदेवेशपरात्परजगद्गुरोः सदाशिव
महादेवगुरुदीक्षांप्रदेहिमे ३ केनमार्गेणभो
स्वामिन्देहीब्रह्ममयोभवेत् त्वंकृपांकुरुमेस्वा
मिन्नमामिचरणौतव ४ श्रीईश्वरउवाच य
स्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथि
ताह्यर्थाः प्रकाशंतेमहात्मनः ५ ममरूपासि
देवित्वंत्वत्प्रीत्यर्थंवदाम्यहं लोकोपकारकःप्र

अनकेनापिकृतः पुरा ६ दुर्लभंत्रिषुलोकेषुतच्छृणुष्व
वदाम्यहं किंचिद्गुरुंविनानान्यत्सत्यंसत्यंवरानने ७
वेदशास्त्रपुराणानिचितिहासादिकानिच मंत्रयंत्रा
दिविद्यानांस्मृतिरुच्चाटनादिकं ८ शैवशाक्तागमा
दीनिअन्येबहुमता अपभ्रंशाःसमस्तानिजीवानां
भ्रांतचेतसां ९ वेदशास्त्रपुराणानिकृत्वादैगुरूक्ता
मयया स्वयंलोकगुरुसाक्षाज्जायतेवेदतत्त्ववित् १०
यज्ञव्रततपोदानंजपतीर्थंतथैवच गुरुतत्त्वम
विज्ञायमूढास्तेचेतरेजनाः गुरुर्बुध्यात्मनोनान्यत्स
त्यंसत्यंनसंशयः तल्लाभार्थंप्रयत्नेनकर्त्तव्यंचम
नीषिभिः १२ गूढविद्याजगन्मायादेहमज्ञानसंभवं
उदयंस्वप्रकाशेनगुरुशब्देनकथ्यते १३ देहीब्रह्म
भवेद्यस्मात्तत्कृपार्थंवदाम्यहं सर्वपापविशुद्धात्मा
श्रीगुरोःपादसेवनात् १४ सर्वतीर्थावगाहस्यप्रा
प्नोतिसफलंनरः गुरुपादोदकंपीत्वाजलंशिरसि
धारयेत् १५ शोषणंपापपंकस्यदीपनंज्ञानतेज
सः गुरोपादोदकंसम्यक्संसारार्णवतारकं १६ अ
ज्ञानमूलहरणंजन्मकर्मनिवारणं ज्ञानवैराग्य
सिद्ध्यर्थंगुरुपादोदकंपिबेत् १७ गुरोःपादोदकंपा
नंगुरोरुच्छिष्टभोजनं गुरुमूर्त्तिःसदाध्यानंगुरु

स्तोत्रं सदा जपेत् १८ काशीक्षेत्रे निवासो सौ जाह्नवी च
रणोदकं गुरुर्विश्वेश्वरः साक्षात्तारकं ब्रह्म निश्चितं १९
शिरःपादांकितं कृत्वा गयायामासौक्षयवटः तीर्थराज प्र
यागो सौ गुरुमूर्त्ते नमो नमः २० गुरुमूर्त्तिं स्मरेन्नित्यं
गुरुनाम सदा जपेत् गुरोराज्ञां प्रकुर्वीत गुरोरन्यं न
भावयेत् २१ गुरुवक्त्रे स्थितं ब्रह्म प्राप्यते तत्प्रसादतः
गुरुमूर्त्तेः सदा ध्यानं यथा स्वैरिणी योषिता २२ स्वाश्र
मं च स्वजातिं च स्वकीर्त्तिं पुष्टिवर्द्धनं अन्यात्सर्वं परि
त्यज्य गुरोरन्यं न भावयेत् २३ अनन्याश्चिंतयंतो मां सु
लभं परमं पदं तस्मात्सर्वप्रयत्नेन गुरोराराधनं कु
रु गुरुवक्त्रे स्थिता विद्या गुरुभक्त्या तु लभ्यते त्रैलो
क्यस्फुटवक्तारो देवाद्यासुरपन्नगाः २५ गुकारश्चंध
कारः स्यादुकारस्तेज उच्यते अज्ञानग्रासकं ब्रह्म गुरु
देव न संशयः २६ गुकारः प्रथमो वर्णो मायादिगुण
भासकः रुकारो द्वितीयं ब्रह्म मायाभ्रांतिविमोचकः
२७ एवं गुरुपदं श्रेष्ठं देवानामपि दुर्लभं हाहाहूहू
गणैश्चैव गंधर्वाद्यैश्च पूज्यते २८ एवं तेषां च सर्वेषां
नास्ति तत्त्वं गुरोः परं आसनं शयनं वस्त्रं वाहनं भूष
णादिकं २९ साधकेन प्रदातव्यं गुरोः संतोषकारकं
गुरोराराधनं कार्यं जीवितं वै निवेदयेत् ३० कर्मणा

गु॰ गी॰ ३

3

मनसावाचासङ्गिराराधयेद्गुरुं दीर्घदंडंनमस्कृत्यनल
ज्जागुरुसन्निधौ ३१ सरीरमर्थंसंप्राणंपस्पुत्रगृहाणि
च आत्मदारादिकंचैवसद्गुरवेनिवेदयेत् ३२ कृमीकी
टभस्मविष्टादुर्गंधमलमूत्रकं श्लेष्मरक्तत्वचामांसंव
तदुरित्यंवरानने ३३ संसारवृक्षमारूढाः पतंतिन
रकार्णवे येनोद्धृतमिदंविश्वंतस्मैश्रीगुरवेनमः ३४
गुरुर्ब्रह्मागुरुर्विष्णुर्गुरुर्देवोमहेश्वरः गुरुरेवपरंब्र
ह्मतस्मैश्रीगुरवेनमः ३५ अज्ञानतिमिरांधस्यज्ञानां
जनशलाकया चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेन
मः ३६ अखंडमंडलाकारंव्याप्तंयेनचराचरं तत्पदंद
र्शितंयेनतस्मैश्रीगुरवेनमः ३७ स्थावरंजंगमंव्याप्तं
यत्किंचित्सचराचरं त्वंपदंदर्शितंयेनतस्मैश्रीगुरु
वेनमः ३८ चिन्मयंव्यापितंसर्वंत्रैलोक्यंसचराचरं
असिपदंदर्शितंयेनतस्मैश्रीगुरवेनमः ३९ सर्वश्रु
तिशिरोरत्नविराजितपदांबुजं वेदांतगर्भसूर्याय
तस्मैश्रीगुरवेनमः ४० यस्यस्मरणमात्रेणज्ञानमु
त्पद्यतेस्वयं सदैवसर्वसंपत्तिःतस्मैश्रीगुरवेनमः
४१ चैतन्यंशाश्वतंशांतंव्योमातीतंनिरंजनं विंदु
नादकलातीतंतस्मैश्रीगुरवेनमः ४२ स्थावरंत्र
चरंशांतंजंगमंचरमेवच येनव्याप्तंजगत्सर्वंतस्मै

श्रीगुरवेनमः ४३ ज्ञानशक्तिसमारूढंतत्वमाला
विभूषितं भुक्तिमुक्तिप्रदातारंतस्मैश्रीगुरवेनमः
४४ अनेकजन्मसंप्राप्तंकर्मबंधविदाहने स्वात्म
ज्ञानप्रभावेनतस्मैश्रीगुरवेनमः ४५ शोषणंभ
वसिंधोश्चदीपनंसारसंपदां गुरोःपादोदकंसम्य
क्तस्मैश्रीगुरवेनमः ४६ नगुरोरधिकंतत्वंनगुरो
रधिकंतपः तत्वज्ञानात्परंनास्तितस्मैश्रीगुरवेनमः
४७ मन्नाथस्त्रिजगन्नाथोमद्गुरुःस्त्रिजगद्गुरुः
समात्मासर्वभूतात्मातस्मैश्रीगुरवेनमः ४८ ध्या
नमूलंगुरोर्मूर्त्तिःपूजामूलंगुरोःपदं मंत्रमूलंगु
रोर्वाक्यंमोक्षमूलंगुरोःकृपा ४९ गुरुरादिरनादि
श्चगुरुःपरमदैवतं गुरोःपरतरंनास्तिश्रीगुरवेन
मः ५० सप्तसागरपर्यंततीर्थस्नानादिकंफलं गु
रोरंघ्रिजलंबिंदुसहस्रांशेनदुर्लभं ५१ गुरुरेवज
गत्सर्वंब्रह्मादिविष्णुशिवात्मकं गुरोःपरतरंना
स्तितस्मात्संपूजयेद्गुरुं ५२ ज्ञानंविनामुक्ति
पदंलभतेगुरुभक्तितः गुरोःसामान्यतोना
स्तिध्येयोसौगुरुमार्गिणा ५३ यस्मात्परतरं
नास्तिनेतिनेतीतिवैश्रुतिः मनसावाचसाचै
वसर्वदाराधयेद्गुरुं ५४ गुरुकृपाप्रसादेन

ब्रह्माविष्णुस्सदाशिवः सामर्थ्यंत्वत्प्रसादेन
केवलंगुरुसेवया ५५ देवकिन्नरगंधर्वाः
पितरोयक्षचारणाः मुनयोपिनजानंतिगु
रुशुश्रूषणाविधिः ५६ महाहंकारगर्वेणवि
द्यातपबलान्विताः संसारकुहरावर्तेघटो
यंत्रेघटोयथा ५७ नमुक्तादेवगंधर्वापित
रोयक्षकिन्नराः ऋषयःसर्वसिद्धाश्चगुरुसे
वापराङ्मुखाः ५८ ध्यानंशृणुमहादेविसर्वा
नंदप्रदायकं सर्वसौख्यकरंनित्यंभुक्तिमुक्ति
विधायकं ५९ श्रीमत्परंब्रह्मगुरुंवदामिश्री
मत्परंब्रह्मगुरुंभजामि श्रीमत्परंब्रह्मगुरुंस्म
रामिश्रीमत्परंब्रह्मगुरुंनमामि ६० ब्रह्मानं
दंपरमसुखदंकेवलंज्ञानमूर्तिंद्वंद्वातीतं
गगनसदृशंतत्वमस्यादिलक्ष्यं एकंनित्यं
विमलमचलंसर्वदासाक्षिभूतंभावातीतंत्रि
गुणरहितंसद्गुरुंतंनमामि ६१ नित्यंशुद्धंनि
राभासंनिराकारंनिरंजनं नित्यबोधंचिदानं
दंगुरुब्रह्मनमाम्यहं ६२ हृदंबुजेकर्णिक
मध्यसंस्थेसिंहासनेसंस्थित दिव्यमूर्तिंध्या
येद्गुरुंचंद्रकलाप्रकाशंसच्चित्सुखाभीष्टव

रंदयानं ८३ श्वेतांबरंश्वेतविलेपपुष्पं मुक्ताफलाभूषि
तंदिव्यमूर्तिं वामांकपीठेस्थितदिव्यशक्तिं मंदस्मि
तंपूर्णकृपानिधानं ८४ आनंदमानंदकरंप्रसन्नं
ज्ञानस्वरूपंनिजबोधयुक्तं योगींद्रमीड्यंभवरो
गवैद्यंश्रीसद्गुरुंनित्यमहंनमामि ८५ यस्मिन्
सृष्टिस्थितिध्वंसविधानंनिग्रहात्मकं कृत्यंपंचवि
धंशश्वद्भासतेतंनमःशिवं ८६ प्रातःशिरसिशु
क्लाब्जेद्विनेत्रंद्विभुजंगुरुं वराभयप्रदंशांतंस्मरेत
न्नामपूर्वकं ८७ नगुरोरधिकंनगुरोरधिकंनगुरोर
धिकं शिवशासनतःशिवशासनतःशिवशासन
तःशिवशासनतः ८८ इदमेवशिवंइदमेवशिवंइ
दमेवशिवंइदमेवशिवं ममशासनतोममशास
नतोममशासनतोममशासनतः ८९ एवंविधंगु
रुंध्यात्वाज्ञानमुत्पद्यतेस्वयं तदागुरुप्रसादेनमुक्तो
हमितिभावयेत् ९० गुरुणादर्शितेमार्गेमनःशुद्धिं
चकारयेत् अनित्यंखंडयेत्सर्वंयत्किंचिदात्मगोचरं
९१ ज्ञेयंसर्वमनित्यंचज्ञानंचमनउच्यते ज्ञानंज्ञेयं
समंकुर्यान्नान्योपंथाद्वितीयकः एवंश्रुत्वामहादे
विगुरुनिंदांकरोतियः सयातिनरकंघोरंयावच्चंद्रदि
वाकरौ ९३ यावद्देहांतकालोस्तितावद्देविगुरुंस्मरेत्

गुरुलोपोनकर्त्तव्यंस्वछंदोयदिभावयेत् ७४ ऊंकारेण
नवक्तव्यंप्राज्ञशिष्यैःकदाचन गुरुरग्रेनवक्तव्यमस
त्यंचकदाचन ७५ योवैद्वंद्वंकृत्यतेकृत्यगुरुनिर्जि
त्यवादतः अरण्येनिर्जलेदेशेसभवेद्ब्रह्मराक्षसः ७६
मुनिभिःपन्नगैर्वापिसुरैर्वाशापितोयदि कालमृत्यु
भयाद्वापिगुरुरक्षतिपार्वति ७७ अशक्ताहिसुराःस
र्वेस्वशक्तामुनयस्तथा गुरुशापहताक्षीणाक्षयंया
तिनसंशयः ७८ मंत्रराजमिदंदेविगुरुरित्यक्षरद्व
यं श्रुतिवेदांतवाक्येनगुरुःसाक्षात्परंपदं ७९ श्रुति
स्मृतिमविज्ञायकेवलंगुरुसेवया तेवैसंन्यासिनः
प्रोक्ताइतरेवेषधारिणः ८० नित्यंब्रह्मनिराकारंनिर्गु
णंबोधयेत्परं पूर्णंब्रह्मनिराभासंदीपोदीपांतरंय
था ८१ गुरुकृपाप्रसादेनआत्मारामोहिलभ्यते
हिलभ्यते अनेनगुरुमार्गेणस्वात्मज्ञानंप्रवर्त्तते ८२
आब्रह्मस्तंभपर्यंतंपरमात्मस्वरूपकं स्थावरंजंग
मंचैवप्रणमामिजगन्मयं ८३ वंदेहंसच्चिदानंदंभे
दातीतंश्रीसद्गुरुं नित्यंपूर्णंनिराकारंनिर्गुणंस्वात्म
संस्थितं ८४ परात्परतरंध्येयंनित्यमानंदकारकं हृ
दयाकाशमध्यस्थंशुद्धस्फटिकसमं ८५ स्फटिकःप्र
तिमारूपंदृश्यतेदर्पणेयथा तथात्मानेचिदाकार

मानंदं सोहमित्युतः ८६ अंगुष्ठमात्रं पुरुषं ध्यायते
चिन्मयं हृदि तत्र स्फुरति यो भावः शृणु तं कथयाम्यहं
८७ अगोचरं तथागम्यं रूपनामादिवर्जितं निःशब्दं तु
विजानीयात्स्वभावं ब्रह्म पार्वति ८८ यथा निजस्वभावे
न कर्पूरकुंकुमादिकं शीतोष्णादिस्वभावेन तथा ब्रह्म
च शाश्वतं ८९ स्वयं सर्वमयो भूत्वा स्थातव्यं यत्र कुत्र
चित् कीटो भृंगेरिव ध्यानं यथा भवति तादृशं ९०
गुरुध्यानं तथा नित्यं देही ब्रह्ममयो भवेत् पिंडे पदे
तथा रूपे मुक्तास्ते नात्र संशयः ९१ श्रीपार्वत्युवाच
पिंडं किं तु महादेव पदं किं समुदाहृतं रूपं रूपाती
तं चैव पतदाख्याहि शंकर ९२ श्रीईश्वर उवाच पिंडं
कुंडलिनीशक्ति पदं हंस समुदाहृतं रूपं बिंदुरिति ज्ञे
यं रूपातीतं निरंजनं ९३ स्वयं सर्वमयो भूत्वा परं ब्र
ह्म विलोकयेत् परात्परतरं नान्यत्सर्वमेव निरामयं
९४ यस्यावलोकनादेव सर्वसंगविवर्जितः एका
की निस्पृहः शांतः स्थातव्यं तत्प्रसादतः ९५ लब्धं वा
प्यनलब्धं वा स्वल्पं वा बहुलं तथा निष्कामेनैव भोक्त
व्यं सदा संतुष्टमानसः ९६ सर्वज्ञायेदनित्याहुर्देही
सर्वमयो विदुः सदानंदः सदा शांतो रमते यत्र कुत्र
चित् ९७ यत्रैव तिष्ठते सोपि स देशः पुण्यभाजनं

गुरुस्वलक्षणं देवि तवाग्रे कथितं मया ९८ उपदेशो म
या देवि गुरुमार्गेण दर्शितः गुरुभक्तिः सदा ध्याने सक
लं तव कीर्तितं अनेन तद्भवेत्कार्यं तद्वदामि महान
पे लोकोपकारकं देवि लौकिकं न तु भावयेत् ९९ लौ
किकं कर्मतो यांति ज्ञानहीना भवार्णवे ज्ञानिनो भव
यन्सर्वं कर्म निःकर्म यान्ति इदं तु भक्तिभावेन प
ठितं श्रूयते यदि लिखित्वा पत्त्रदानं वा तत्सर्वं सफ
लं भवेत् २ गुरुगीताभिधं देवि शुद्धतत्त्वं मयोदितं
भवव्याधिविनाशार्थं स्वयमेव सदा जपेत् ३ गुरुगी
ताक्षरैकैकं मंत्रराजमिदं प्रिये अन्ये च विविधा मंत्राः
कलां नार्हन्ति षोडशीं ४ अनंतफलमाप्नोति गुरुगी
ताजपेत्सदा सर्वपापसमूहघ्नं सर्वदारिद्र्यनाश
नं ५ अकालमृत्युहरणं सर्वसंकटनाशनं यक्ष
राक्षसभूतानां चोरव्याघ्रभयापहं ६ महाव्याधिह
रं चैव विभूतिसिद्धिदं भवेत् अथवा मोहने वश्ये
स्वयमेव जपेन्नरः ७ कुशो वा दूर्वापादे विश्रासने
शुभ्रकंबले उपविश्य ततो देवि जपेदेकाग्रमान
सः ८ शुक्लासने वै शांत्यर्थं वश्ये रक्तासने प्रिये
अभिचारे कृष्णवर्णं पीतवर्णं धनागमे ९ उत्तरे शां
तिजाप्यं स्याद्वश्ये पूर्वमुखोदितं दक्षिणे मारणं

प्रोक्तंस्तंभनेपश्चिमेसुखं ९ मोहनंसर्वभूतानां
वैधमोक्षकरंपरं देवभूपप्रियकरंराजानंवशप
मानयेत् ११ सुखस्तंभकरंन्नृणांसद्गुणानांविवर्द्ध
नंदुष्कर्मनाशनंचैवसत्कर्मसिद्धिदंभवेत् १२ अ
सिद्धंसिद्धयेत्कार्यंनवग्रहभयापहं दुःस्वप्नना
शनंचैवसुखसौख्यंचप्रदायकं १३ सर्वशांतिकरंनि
त्यंवंध्यापुत्रफलप्रदं अवैधव्यकरंस्त्रीणांसौभा
ग्यदायकंपरं १४ आयुरारोग्यमैश्वर्यंपुत्रपौत्र
विवर्द्धनं निःकामतस्त्रिवारंवाजपेन्मोक्षमवाप्नु
यात् १५ अवैधव्यंसकामेनलभतेवान्यजन्मनि सर्व
दुःखभयंविघ्नंनाशयेत्तापहारकं १६ सर्ववाधाप्र
शमनंधर्मार्थकाममोक्षदं यंयंचिंतयतेकामंतंतं
प्राप्नोतिनिश्चितं १७ कामितस्यकाकामधेनुःकल्पि
तस्यकल्पद्रुमं चिंतामणिश्चिंतितस्यसर्वमंगल
कारकं १८ मोक्षहेतुर्जपेन्नित्यंमोक्षश्रेयमवाप्नुया
त् भोगकामेजपेद्योवैतस्यकामफलप्रदं १९ ज
पेत्शाक्तेश्चसौरेश्चगाणपत्येश्चवैष्णवे शैवस्यसि
द्धिदंदेविसत्यंसत्यंनसंशयः २० अश्वत्थकाम्यजपस्था
नेकथयामिवरानने सागरेसरितातीरेतीर्थेहरि
हरालये २१ शक्तिदेवालयेगोष्ठेसर्वदेवालयेशुभे
वटस्यधात्रिमूलेवामठेवृंदावनेतथा २२ पवित्रे

निर्मलेस्थाने नित्यानुष्ठानतोपिवा निर्वेदनेन
मौनेन जपमेतत्समाचरेत् २३ श्मशाने भय
भूमौ च वटमूलान्तिके तथा सिद्ध्यंति यौ नरे
मूले चूतवृक्षस्य सन्निधौ २४ गुरुपुत्रवरो मू
र्खस्तस्य सिद्ध्यंति नान्यथा शुभकर्माणि सर्वा
णि दीक्षादीक्षितसिद्धिदाः २५ संसारमलना
शार्थं भवपाशनिवृत्तये गुरुगीतांभसि स्ना
नं तत्वज्ञः कुरुते सदा २६ स एव सद्गुरुः सा
क्षात्सदसद्ब्रह्मवित्तमः तस्य स्थानानि वर्णा
नि पवित्राणि न संशयः २७ सर्वेशाः शुद्धोप
त्रासौ स्वभावाद्यत्र तिष्ठति तत्र देवगणाः स
र्वे क्षेत्रपीठे वसंति हि २८ आसनस्थाः शया
नस्थो गच्छंस्तिष्ठंतोपि वा अश्वारूढो गजा
रूढो सुषुप्तो जाग्रतोपि वा २९ शुचिष्मांश्च स
दा ज्ञानी गुरुगीताजपेन तु तस्य दर्शनमात्रे
ण पुनर्जन्म न विद्यते ३० समुद्रस्य यथा तोयं
क्षीरे क्षीरं जले जलं भिन्ने कुंभे यथाकाशं त
थात्मा परमात्मनि ३१ तथैव ज्ञानी जीवात्मा
परब्रह्मणि लीयते एको नरमते ज्ञानी यत्र
तत्र दिवानिशं ३२ एवंविधो महामुक्तः सर्व
दा वर्तते स्वयं तस्मात्सर्वप्रयत्नेन भक्तिभा

वं करोति यः ३३ गुरौ संतोषिते सर्वे संतुष्टास्ते
नात्र संशयः भुक्तिर्मुक्तिर्दयास्तेषां जिह्वाग्रे च
सरस्वती ३४ अनेन प्राणिनः सर्वे गुरुगीता
जपान्विताः तस्य सिद्धिमवाप्नोति भुक्तिर्मुक्तिर्न
संशयः ३५ सत्यं सत्यं पुनः सत्यं निजधर्मो म
योदितः गुरुगीतासमं नास्ति सत्यं सत्यं वरा
नने ३६ गुरुर्देवो गुरुर्धर्मो गुरौ निष्ठा परं तपः
गुरोः परतरं नास्ति नास्ति तत्वं गुरोः परं ३७ य
स्य माता पिता धन्यो धन्यो वंशः कुलं तथा धन्या
श्च वसुधा देवि गुरुभक्तिः सुदुर्लभा ३८ शरी
रमिंद्रिया प्राणाः अर्थः स्वजनबांधवाः पिता
माता कुलं देवि गुरुरेव न संशयः ३९ आक
ल्पजन्मनां कोटिजपव्रततपःक्रियाः तत्स
र्वं सफलं देवि गुरुसंतोषमात्रतः ४० विद्याय
न मदेनैव मंदभाग्याश्च ये नराः गुरुसेवां न
कुर्वंति सत्यं सत्यं वदाम्यहं ४१ ब्रह्माविष्णुम
हेशाद्दि देवर्षिपितृकिन्नराः सिद्धचारणय
क्षाश्च मुनयो ऋषयो जना ४२ गुरुसेवापरं
तीर्थमन्यतीर्थं निरर्थकं सर्वतीर्थाश्रयं देवि
सद्गुरुश्चरणांबुजे ४३ इदं रहस्यं परमं तवा

गु·गी·
५
४

येकथितंमया स्तगोप्यंच प्रयत्नेन आत्मानंत्वं
प्रयास्यसि ४४ स्वामिमुख्यगणेशादिवैष्णवा
नांचपार्वति मनसापिनवक्तव्यंममसान्निध्य
कारकं ४५ अतीवचित्तपक्वानस्य श्रद्धाभक्तिस
मन्वितः प्रवक्तव्यमिदंदेवि ममात्मासिसदा
प्रिये ४६ अभक्तेवंचकेधूर्तेपाखंडेनास्तिकेन
रे मनसापिनवक्तव्यंगुरुगीतामियंप्रिये ४७
गुरवोबहवः संतिशिष्यवित्तापहारकाः दुर्ल
भोयंगुरुर्देविशिष्यसंतापहारकः ४८ संसार
सागरसमुद्धरणैकमंत्रंब्रह्मादिदेवमुनिपूजि
तसिद्धमंत्रं दारिद्र्यदुःखभयशोकविनाशमं
त्रंवंदेमहाभयहरंगुरुराजमंत्रं ५० इतिश्री
ईश्वरपार्वतीसंवादेश्रीगुरुगीतासमाप्तम्
रामनगरकापोथी